No. ५६२-घ

Title रसमञ्जरीटीका "रसमञ्जरीविकास:"

Author गोपाल: बोपदेवापरनामधेयः।

Extent १२३ Age

Subject अलङ्कारशास्त्रम्

रसमंजरी विकासाभिधटीकासहिता

५७२ १२३

ॐ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ निगमानुगीतकी

र्त्तिं चिंतितमूर्त्तिं विरिंचिमुख्याद्यैः ॥ नाशितभक्तजनार्त्तिं वंदे

सम दक्षिणामूर्त्तिम् ॥१॥ भूषितभस्मपरागः कृतानुरागः कचिज्ज

टी १ टामुकुटी ॥ फालविहारभूषणगात्रः स्वर्ड्डुकवेः शिवो जयति ॥२॥ ल ६

विलसत्नूतनभूतं विस्तृतमन्तमसुखबुभूतानां ॥ आद्यापि

वाक्प्रयंतन्तु दनुमहोमयांतरं तिमिरम् ॥३॥ उक्तविधूनमू १

लं स्वैरमजं तमनुकूलम् ॥ विधालतालवालं शिववालं

नमामि निगमभालम् ॥४॥ आत्मीयदत्तसिद्धिं नतकृतबुद्धिं

प्याचकृतमृद्धिः ॥ शाब्दिनविपदां वृद्धिः कुलदेवो विद्धलो जयति ॥५

मा यत्नुमालवालं श्रीयोन्यस्य कल्पकलापरनामा ॥ फणिपतिरुरुमीश्र
तमेतमहं विज्ञानदं वंदे ॥ ६ ॥ श्रीनृसिंहाचार्यसंज्ञं तातं गुणगणान्वितं ॥
गौरीमिव गुणैर्युक्तां सुरवाबांच ननाम्यहं ॥ ७ ॥ कृष्णतीर्थनिकेतनं ध्र
तरुशाः कौंडिन्यवंशोद्भूता चार्यारव्या गुणांबा स्वयस्य पितृसुखैः सु
धाशीकरः ॥ मंत्रः केननुबालसुधाद्रवन्मृतं तमेयप्रणीतं दनोविद्वांसः
कतिनाम वान्विति महान्त्वं धीरांधिनास्पदं ते ॥ ८ ॥ चौमिदुठुलपादसे
वनपरिप्राप्ते द्भावान्देवता पूर्वं गृहं विधानदीप्तिनधियस्तेनं तरामा
दयः ॥ गोपालं च पितामहं सम्वयधीकृतप्रियं भातुकाः पूर्वेषस्य

जयंति तत्र वसुधागीर्वाणगीर्वाणकाः ॥९॥ यो विद्यानिखिलमहार्णो
र्णावगाही धत्ते यः सकलकलोपनामसार्थे ॥ यत्कीर्तिर्शुद्धिविवितनतास
मेंगनायोविप्राग्र्याजयंतिपस्यसानंतातः ॥१०॥ अत्र च पंडितानान्य
लभ्योर्विप्रेशो धत्ते यस्यानंदतेवापयोस्मी ॥ कन्यवीतविंध्यसत्या
गवाद्धोः प्रख्याराद्धं तमिहराद्धमस्ति ॥११॥ तत्राजस्त्रहुतावितः स
जवलग्राम्येलकासा [illegible] गोपालो तस्य जनुर्नृसिंहतनयो गोपालनामा
बुधः ॥ साहित्यार्णवपारगस्य च सांभानोर्मनोहारिणी व्याख्या पुरवा
तसांपदार्पविविद्धोधानतनोति स्फुटाम् ॥१२॥ क्रीडासहं यः कुरुते शिरी
षमम्लानयन्त्वारसमुद्धरन्नपि ॥ अवाच्यतां याति विवेचयन् सः

र म
होर २
२

२

ध्रि २

साहित्यमार्गनिपुणाः कदापि वा ॥१३॥ वाग्जालमाकलयतापि सु
पद्यदूत्यभावोधनिरस्य चिरेणा कथंचसुलभ्या ॥ वल्लीवितानमनुसं
ततिमोहमानः कोशापि किंनु कुसुमावचितो विदग्धः ॥१०॥ क
लयन्नपि तर्कककेशमी न्नेहि साहित्यकलाविदां समः स्यात् ॥
अपि यत्र द्विजतां सवर्णतां वान हि कोकः पि करम्पनिस्वनो
स्ति ॥१५॥ दधतोद्यत [illegible] सासुमा खचत्रिं नहि साहित्यकलासु
ते प्रवीणाः ॥ हृयदामनुधायिनः पुलिंदा नहि पुष्पन्यसने पि
ते प्रवीणाः ॥१६॥ शिवपूजनमंतरेण लभ्यं न हि साहित्यविदः
त्वमेकमेव ॥ पुनरेव यदीदमस्ति शास्त्रे सहलभ्यं किमतः परं
हि नाम्यमर ॥१७॥ इति यद्यपि शास्त्रचंचुनाबुधसाहित्यमज्ञा

र मं
ठी २
3

नतामयापि॥ विवृतिर्येच सस्ता प्याविधस्यतु पहासाय तथापि
नोपहास्यम्॥१८॥ श्लोकं किंचिदिह ब्रवीमि सुजनाः प्रासंगि
कं विस्तराद्गीतेस्तात्कलयंतु निर्मलतया श्रोध्यं तथा वा पस
त॥ सामन्यं यदि कुत्र चित्तदिह च प्राच्यात सञ्चेत सां प्राचां तद्ग
रतादिकाव्यरसिकाम त्राव धार्येबुधैः॥१९॥ इहखलु यश
से र्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कांता ३
संमिततयोपदेशयुज इति प्राचीनवचनप्रामाण्यात् काव्यस्य
कीर्त्यादिधनेक मनीषितसंपादकतामनुगच्छन्तो देदीप्यमाना
यौसगुणावेन लेकतीति न वा विवत्याविशिष्टंलतादितरस्य
काव्यालापतेन का व्यालापांश्च वर्जयेदिति निषेधं चानुजा

नन्वरसमंजरीनामकग्रंथविशेषं चिकीर्षुर्भानुकरनामा कविः चिकी
षितनिर्विघ्नपरिसमाप्तिप्रचयगमनप्रयोजनविशिष्टशिष्टाचारा
नुमितमंगलाचरणमनुमत्याशीर्नमस्क्रियावस्तुनिर्देशो वा त पि
न्मुखमित्याशीराद्यन्यतमस्य प्रबंधमुखलक्षणत्वाच्च प्रकृते
पद्ये मस्वरलक्षणं वस्तुनिर्दिशन्नादौ पलक्षणं नमस्क्रियालक्ष
णं मंगलाचरणमातनुते ॥ आत्मीयं चरणं दधाति पुरतो निम्नो
न्नतायां भुवि स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशंकया ॥
तल्पे किंच मृगत्वचापि विरचिते निद्राति भागैर्निजैरंतःप्रेमभराल
सां प्रियतमामंगे दधानो हरः ॥१॥ यो हरः निम्नोन्नतायां निम्नाया
मुन्नतायां भुवि प्रदेशे नीचोच्चप्रदेशे क्षिति यावत् निम्नं गभीरं

रमित्यमरः॥ म्लानं निरवग्लानमित्यमरः॥ भ्रशाद्वेनोन्नेकृतप्रदे
शात्कद्यत्तेनीचोच्चप्रदेशेषुपुरतः अग्रतः। स्यात्पुरः पुरतोग्रत इ
त्यमरः॥ अस्यप्रयोगस्यसर्वैरप्यनिहितेरादनत्वाद्यथातपास्यग
तिश्लिष्टांननीया॥ पंचनेत्यापुरतोविडंवनेत्यत्रदुर्घटवृत्ति
कारः॥ विपर्यैर्घ्यस्थकविधानमितिकप्रत्ययेतदन्तात्तसिलि
ति॥ नचित्यं विवक्षितत्वात्सिद्धेः। आन्मीयं आत्मनोयमात्मी
यः छकचोछ इतिछप्रत्ययः। आमेन्नि स्वजनेनिरवनप्राकीना
छस्त इतिछस्येयवकादेशः। स्वीयं चरणापादं दधातिनिक्षिपति॥
दद्या तिवापाठः। अतिसुकुमारसरोजायाउमायास्तथा
त्वेसति पीडाजन्यवेदितिकल्पयेनिभावः॥ अस्यस्वेदस्यार्थकाकुरोत्स

हल्लइत्यइ इति तर्कः तथा पार्वत्या इति शेषः। सापेक्षत्वेपि गमकत्वात्समासः।
शोत्रासवितर्के चैतिविश्वः। अमोमवेत्नु किमिति यावत्। यद्वा अमादासं
कात्रनिसृष्टप्रतिसंघानं। पंचमीति योगविभागात्समासः। नशोर्वेत्स्पपु
ष्पंस्त्रीयेनतिजेव। रत्नादित्वाच्छप्रत्ययः। करेणहस्तेनकर्षतिआकृष्या
वतिनोति। किंचान्यदपि। मृगतत्वचामृगाजिनेनविरचितेसज्जितेतल्प
शायनीये। तल्पंशयनीयमितिविश्वः। निजेः स्वीयैरेवभागैरेकदेशैर्निद्रा
तिस्वपिति। निद्रा। पूर्वोद्द्राति। उमांगलतिकातत्संपर्केणानपीडयेत्रिमि दि
येतिभावः। किमित्य वस्त्रयमेवचेष्टितवानित्याह। पतः अत्र अभ्यन्तरे
प्रीतिभरेणाल्लसांनिर्व्याजांप्रियतमांनायिकां। आतिरायेनतमविष्टेना
विजितमपुनश्चहरस्यप्रियांतराभावेनयंप्रियासाप्रियतमेतिवत्कुम

युक्तत्वेन प्रियतमामौलिं धारणफलकेन न मया विशिष्टं विशेषणमयुक्तमिति
वाच्यं। प्रियाशब्दस्य संबंधिशब्दत्वेन येषां याः प्रियास्तासामियं प्रियतमेत्यु
क्ते तदितरदंपत्यनुगतप्रियत्वापेक्षया हरस्येत्यस्य समाधानमिति व
२ मं क्तुं शक्यत्वात्। इयमासां प्रियतमेत्युक्तेन लोकस्येवेति नियम्यते। न च वर्ग
टीप ५ गयाकौतांतरं संभावनीयम्। हरस्य तत्र स्त्रीत्वानभिमानात्। तामंगे शरी
5 रार्द्धभागे दधानो बहुनरइतिहेतुरूर्ध्वमिदं विशेषणम्। एवंविधो हर ईश्वरः तु ५
यतीत्यध्याहारः। यत्न छेद्वो वाध्याहर्त्तव्यो। यस्मादसौ प्रियतमामंगे दधा
नः सर्वदश्यति कर्षति निद्रां निःस एवंविधो जयतीति फलमंतमंगलं
स्फुटमवगम्यते। अन्यथा प्रियामंगे दधानो हरस्य स्वरसात् दृशति पुष्पं
कर्षति भागे निद्रां तिप तावताप्रकृते किमायातं। वस्तुनिर्देशात्मकं मं

गले चेत्किं वस्तु निर्दिश्यत इति संदिह्यते। संबंधोप्यसमंजसस्त्रुटित इव ल
गति। तथापि यथारुचि विधाय तामित्यपि ब्रवीमि। अंतः प्रेमचरालसद
निवापाठः। अत्र तादृशस्यापि हरस्य तादृशव्यापारकरणस्य प्रियतमाम
ति विशेषणं तु कूलतमुचितं॥ अथवा हर ईश्वरः। मृगलतचामृगस्य पशु
प्रायस्य तचात्र वरसोन अज्ञानेन विरचितनिर्मिततल्पे मोहस्याने
पुत्रवित्तादौ प्रपंचेपि निजेरात्मीयेरनिद्रा जिमागे रनिदूरमोहरतिमा
गे रतिमजनेः पुष्पं पुष्पमिवाचरं तं मोदनविकसं तं आत्मीयं मन्त्रं नि
म्नोन्नतायां श्रुतिनीचोच्चयानावपि पुरतो निकटे भूतारसां शब्दं तारकं
ब्रह्मोपदेशं ददाति। यद्वा चरसांपादावलंबं अर्थात्स्वीयं ददाति। किंच पु
नरपि अमापेत्तया केवलं पादस्पावलंबमात्रेदत्ते तत्केनो नैव नावता

र मं
टी६
६

व्यापारेणाभक्तस्य भ्रमो [?]वेदितिकूपयावितर्केणास्वीयेन स्वव्यापृते
न स्वकरेणाङ्गं गेस्वम् नीदधानः निधातुकामः स्वसायुज्यं दातुमिच्छ
न्निति यावत् तरोरिव विस्मृतिशीलान् संसारान्प्रेममरालः सः मनसि
भक्तप्रेम्नव्याप्तश्चेत एव प्रियतमान्भक्तान मतिप्राप्तो तीतिप्रियतमा
म श्रमते विचुप्रत्ययः स जयतीत्यध्याहारः इति ध्वनिः प्रकृते प्रियत
माधरस्य स्पहेतोः स्मरणात्रयपदार्थत्वेन काव्यलिंगमलंकारः तदुक्तं हे
तोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति शार्दूलविक्रीडितं वृत्तं ॥ लक्ष
णं तु सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं ॥१॥ इदानीं प्रयो
जनमनुद्दिश्य न मंदोपि प्रवर्तत इति न्यायेन रसिकानां मध्यान्हे रसां प्र
हेतवे ग्रंथकरणप्रयोजनं निरूपयन्प्रतिजानीते ॥ विद्युत्कुलमनो ६

ंगाररसस्यासंगहेतवे। एषा प्रकाश्यते श्रीमद्भानुना रसमंजरी॥२॥ विदुषां वि
पश्चितां। विद्वान्विपश्चिद्दोषज्ञ इत्यमरः। कुलं गणः। सजातीयगणः। गोत्रे दे
हेऽपि कलितं कुलमिति विश्वः। तस्य पद्मानसा दूवभृंगो द्विरेफः द्विरेफपुष्प
लिड्भृंग इत्यमरः। तस्य यो रसस्यासंगः रसः शृंगारः पुष्परसश्च तस्यास्या
संगश्च आस्वादसंबंधेन प्राप्तिः स एव हेतुः निमित्तकारणं हेतुषु सर्वासां
प्रायदर्शनामिति वाचिनेकी चतुर्थीकारणे तस्मै। श्रीमद्भानु[illegible]ः प्र
तिज्ञाकवित्वबीजरूपः संस्कारविशेषः इति यावत् तद्वता भानुनाम्नाक
विना एषा बुद्धिस्था रसमंजरी रसः शृंगारादिस्तद्वती मंजरी मंजरीव मं
जरी न तु इयं केयं रसवती। यतो रसो नाम विभावैरनुभावैः स्वसात्विकैर्व्य
भिचारिभिः आनीयमानः स्वादुत्वं स्थायीभावो रसस्मृत इति विभावा

नुभावव्यभिचारिसात्त्विकैः काव्योपात्तैरभिनयोपदर्शितैर्वा श्रोतृप्रेक्षकाणा
मंतर्विपरिवर्तमानो रत्यादिस्थायी स्वादगोचरतां निर्भरानंदसंविदात्मता
मानीयमानो रसः इति तेन प्रेक्षकाणामेव रसवत्त्वं युक्तम् । सत्यं । इयं तु तथा
२ मं विधानंदसंविदुन्मीलनहेतुभावेन रसवतीत्युच्यते आयुर्घृतमित्यादि
टी० ७ व्यपदेशवदिति अस्तु महाविचारेण प्रकाश्यते स्फुटीक्रियत इत्यर्थः ॥ ७
अन्यापि रविरश्मिविकासिता रसवती मंजरी भृंगरसव्यासंगहेतुकामव
7 ति । अत्र रसव्यासंगहेतोरुत्तरार्द्धपदार्थत्वेन काव्यलिंगमलंकारः । रसव
त्येव छेकानुप्रासानुप्राणितः । अनेन विषयादिसाधनचतुष्टयमपि
दर्शितं ॥२॥ इति प्रयोजनं निरूप्य प्रकृतमनुसरति । तत्र रसेषु शृंगार
स्याभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिकास्तावन्निरूप्यते तत्र ता

स्यां प्रतिज्ञातायां मंजर्य्यां रसेषु हास्यादिषु शृंगारस्याभ्यर्हितत्वेन प्राधान्ये
न तथा च । शृंगं प्राधान्यं । शृंगमियर्तीति शृंगार इति गगता विन्यस्मा
के मेरा पररम प्रत्ययः । श्रेचाशितीति वृद्धिः । श्रुतस्तदुपन्यसनं प्रथममिति
भावः । तयाचेवतस्य च शृंगारस्यावलंबनविभावत्वेन नायिकायाः इति श
षः । तथा च भरतः । ज्ञायमानतया यत्र विभावो भावपोषकृत् । आलंब
नोद्दीपनत्वं प्रभेदेन स च द्विधेति । एवमियममयमेव त्यतिशयोक्तिरू
पकाव्यव्यापाहितविशिष्टरूपकतया ज्ञायमानो विभाव्यमानः सन्नलं
बनत्वेनोद्दीपनत्वेन वा यो नायिकादिरभिमतदेशकालादि वो स विभा
वः । यमालंब्य रस उत्पद्यते स आलंबनविभावस्तत्वेन । विशेषविचा
रस्तु विस्तरभियान प्रपंच्यते । तेन प्रतिपाद्य शृंगारसंबोधितया नाव

र मं
हो २
8

त्र प्रथमं नायिका निरूप्यते प्रपंच्यते न च स्वीयापरकीयासामान्यत्वेनना
यिकानामनेकत्वान्नायिका निरूप्यत इत्येकवचनं न संगच्छत इति वा
च्यम्। नायिकात्वावच्छेदकावच्छिन्ना नायिकेत्युक्ते सर्वासामपि संग्र
हात् नायिकात्वस्य सर्वानुगतत्वेन सर्वप्रतीतिग्राहकत्वात्। तदुक्तम्
गोत्वावच्छेदकावच्छिन्ना गोरानीयतामित्युक्ते ह्यनेकासामप्यानयने २
स्यात्। तथा च व्यक्तेः रूपगात्मकत्वेन न तद्द्विवचनाय एकादिसंख्या
परिकल्पनेन तदर्थस्यान्यथासिद्धत्वात्। गावः इति बहुवचनप्रयोगान
पेक एव स्यात्। अवच्छेदकविशेषणानां स्थानादिव्यावृत्त्यर्थे। व्यक्तौ संकेते
गृहीतेऽश्वत्वावच्छिन्नेऽपि पिंडे गोत्वभ्रमत्वात्। एकस्यां व्यक्तौ कृतस्य संकेतस्य
परस्यां प्रकारभिन्नायां विस्मृतत्वात्। व्यक्तीनामनंतत्वात् संकेतग्रहणा

स्याप्राकालात्। किंच। एकत्वविवक्षायामुत्पन्नमेकवचनमेकामेव व्यक्तिं प्रत्या
पयेन्नानेकाः। अत्रोच्यते। जात्यभिप्रायमेकवचनमेतद्व्यं अत्राप्येवं वि
चार्यते। किं जातिरसन्निहिता सन्निहिता चापदार्थः। नाद्यः। क्रियासंबंधा
न्नोदनावाक्यार्थानां निर्विषयत्वेन साधनवैकल्यफलविरहात्। द्विती
येऽपि प्राधान्येनाप्राधान्येन वा। तत्र प्रथमे प्रथमदोषापातः। न द्वितीयः।
ब्राह्मणो न हंतव्य इत्यादेरेकब्राह्मणावधेऽनिषेधस्य सावकाशत्वेनैक
ब्राह्मणवधे याद्दच्छिकत्वात्। कस्तर्हि पदार्थः प्रतीयतामिति चेत्। अ
त्राश्रयपर्यायेणानयनेनान्तरीयकत्वमप्राधान्येनोपावयीति ब्रूमः। [illegible]
हि जात्यभिप्रायेणोत्स्यस्य गतिः। प्रकाशावस्थेः प्रथमप्रतीतत्वं ज्ञातेर
पि प्रथमप्रतीतत्वादित्येतदपि समर्थ्यते। अत्र सूत्रपरंपरा तेऽप्यलमति

र मं
टी० ९
१

प्रसंगेन । नन्वेतित्तद्धृदस्य नायिकानिरूपणेन संबंधः । ननु लोहितोष्णीषा
ऋत्विजः प्रचरंतीत्यत्र मात्विक्प्रचरणस्यान्यथासिद्धत्वेन लोहितोष्णीष
मात्रं विधेयं । तथा दध्ना जुहोतीत्यादौ हवनस्यान्यथासिद्धत्वेन दध्यादेः
करणत्वमात्रं विधेयमिति वत्तत्र रसव्यासंगस्यान्यथासिद्धत्वेन नायिका
निरूपणमात्रमिह विधेयमिति सिद्धं तथा च विद्धाकुलेति पद्यात्मकग्रंप ९
करणश्रयोजनीकृतरसनिरूपणस्याविधेयत्वे प्रतिज्ञाहानिविरोधापी
तिचेत् । सत्यं । अत्र नायिकानिरूपणं रसव्यासंगश्चेत्युभयं विधेयं । त
थाहि । नायिकानिरूपणस्य । उद्देशभेदेनान्यथासिद्धत्वेन पद्योपनिब
द्धत्वेनादिविभावत्वेनानितरसव्यासंगस्य विधेयत्वम् अत एव रसमंजरी
तिनामकरणपूर्वकं हि कार्ये निरूपणमिति रसालंबनकारणत्वेन नायि

कानिरूपणं ॥ रसनिरूपणस्यापि ग्रंथांतरवदन्यथासिद्धत्वेन इह च बाहुल्येन
तद्भेदस्य भावाबस्यानिरूपणस्य प्राधान्यान्निरूपणमपि विधेयमिति उभयस
प्यत्र प्रधानमिति तस्य विस्तरः सोपि प्रकारैर्भिद्यत इत्याह ॥ साच त्रिविधा स्वीया परकीया
सामान्या चेति ॥ साचापि पूर्वाभिप्रायेणैकवचनं तदेव विवृणोति ॥ स्वकीयेति ॥ ननु ग
हादिभ्यश्च इत्यत्र जनपराभ्यां कुक् चेति गणसूत्रेण जनेपरयोरेव छे कुगागमविधाना
त्कथमत्र कुगिति चेत् ॥ सत्यं ॥ स्वशब्दात् स्वार्थे कप्रत्यये तदंताद्गहादित्वाच्छप्रत्य
यः ॥ परकीयेति ॥ जनपराभ्यां कुक् चेति परशब्दात् कुक् छ प्रत्ययो ॥ सामान्येति ॥
सामान्यैव सामान्येति चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् ॥ सर्वसाधारणेत्यर्थः ॥ ननुगं
प्रामूके स्वान्यासाधारणस्त्रीति तत्कुतो नायिका त्रिधेति ॥ तत्र स्वकीयां लक्षय
ति ॥ तत्र स्वामिन्येवानुरक्ता स्वीया ॥ न च परगृहीतायां परगामिन्यामव्याप्तिः ॥ तास्वित्य

र्थः। अनुरक्ता स्वीये तु केचिदनुरक्ताया: स्वीयात्वं स्यात् अत: स्वामिनीति। स्वामिश
ब्देनात्र पतिरभिधीयते। एवमपि परगामिन्यापि कदाचित्स्वामिन्यप्यनुरक्तेति तत्रा
तिव्याप्तिः। अत: एवकारः। यत एवकारस्ततोन्यत्रावधारणमिति स्वामिन्येवानुर
र मं क्ता न कदापि जारे सा तु जारेष्वनुरक्तेति नातिव्याप्तिः। एवं च लक्षणे निवेश्य निश
टी १ ष्टं किं न श्रूयेवादिनं उत्तरवादी उत्तरयन्नाह। न चेति। परिणीतायामुद्वाहितायां परगा १
10 मिन्यामव्याप्तिः। अत्र लक्षिता स्वामिसंबंधिनी तदेकदेशानुरक्तत्वधारणव्यावर्तितप
रानुरक्तत्वरूपेलक्षणस्य व्यावर्तनेन रूपामव्याप्तिमनिष्टं यत्प्रतिसंदधासि तन्न च मं
तव्यं परगामिन्याः स्वलक्षणत्वादेतदनिष्टमेव न भवतीत्याह। अत्र पतिव्रताया एव
लक्षणत्वात्। [illegible]। अत्र च लक्षणे पति
व्रता एव नान्यास्यात् त्वन्ययोगव्यवच्छेदार्थ एवकारः। मातर्हि किं जातीयेत्याह। तस्या

स्वपरगामितयापरकीयात्वमुपयाति। परिणीतत्वेनस्वामिसंबंधिनीत्वंपर
गामितयापरकीयात्वमपीत्यपिशब्दार्थः। साकिंव्यापारेत्याह। अस्या
श्चेष्टामन्तुःशुश्रूषाशीलंरक्षणं। आर्जवंक्षमा। स्वीयायाइत्यर्थः। त
मेवविवृणोति। मन्तुरित्यादि। प्रेरणातःसनेतादत्ययेशुश्रूषेतिव
रिवस्यातुशुश्रूषापरिचर्याप्युपासनमित्यमरः। शीलस्यसद्वृत्तस्य
संरक्षणं। अनन्यथाकरणं। शीलंस्वभावेसद्वृत्तइतिविश्वः। आर्जवंअकौ
टिल्यं। क्षमाशान्तिः। तामेवचेष्टामुदाहरणमुखेनस्फुटयति। यथेति। य
थेदंचेष्टाव्यंजिकाफक्किकानतुलक्ष्यंपद्यमत्रोदाह्रियतइतियथाशब्दार्थः।
एवंसर्वत्रज्ञेयं॥ गतागतकुतूहलंनयनयोरपाङ्गावधिस्मितंकुलनत
भ्रुवामधरएवविश्राम्यति। वचःप्रियतमश्रुतेरतिथिरेवकोपक्र

मःकदाचिदपिचेत्तदामनसिकेवलंमज्जाति॥१॥कुलस्यनततनुवःनते
नेप्रमदनचापवदितिभावःभुवोऊर्द्धेदृम्म्यांनुवोस्त्रियामित्यमरःयस्सांकु
लनततनुवोकुलनततनुपाद्देनात्रपतिव्रतागम्यते।कुलस्यान्वयस्य।संततिर्गो
२ म त्रजननकुलान्यभिजनान्वयादित्यमरः।तस्यसंबंधिन्यइत्युक्तेसर्वथाकुल
टी११ संबंधनत्यजंतीत्यर्थः।सदाचारवान्वंशःकुलमित्युच्यते।इतरस्तीलामेवं ११
॥ व्यापाराभावप्रतिपादनायकुलस्याद्यप्रयोगः।श्लोकीयपदसार्थक्यप्र
दर्शनेप्रस्तावादेपस्यानुपयोगितातर।नासांनयनयोर्नेत्रयोः।लोच
नंनयनंनेत्रमित्यमरः।गतागतकुतूहलंगतेप्रेरणेआगतेमाकुं
चनंतद्विषयकंयत्कुतूहलंकुतुकं।कुतुकंतुकुतूहलमित्यमरः॥
अपांगावधिअपांगोनेत्रप्रांतोअपांगोनेत्रयोरंतावित्यमरः।तदवधि

तत्परिधिं नं परिधेरे विलेवधि रित्यमरः॥ कुलनतमुखामित्यस्य सर्वत्रापि संबंधः
स्मितं हसितं चेदधरपल्लवस्य धरोष्ठ एव। ओष्ठाधरौ त्वित्यमरः॥ विश्राम्यतीति विश्रांतिं
याति नतमुखत्वेन घ्राणगघ्रतीत्यर्थः। ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः। अन
द्धितद्विजं धीरमुत्तमानास्मितं भवेदितु उत्तमत्वं धन्यते तथा वचनं प्रियतमस्य तेरे
वनायकस्य श्रवणस्ये वत्येवकारो भिन्नक्रमः। गतिर्थिरावेशकाः स्पुरावेशकस्यागंतु
रतिर्यन्त्रो गृहागत इत्यमरः॥ वचनं तु यथा कथंचिन्नायकस्य तेर्गोचरः॥ तथा कदा
चिदपि केन चित्कान्ताविशेषेत्यर्थः। कोपक्रमः कोपारामस्वेतर तदा केवलमेकेषास्व
वामनासिमज्जाति लीनो भवति केवलमिति त्विंगत्वेकक [illegible] स्वयोरित्यमरः॥
स्वभावोक्तिरलंकारः। लक्षणं च। स्वभावोक्तिस्तु डिंभादेः स्वक्रियारूपवर्णनमि

सेयंक्रमसोल्लज्जाभय[illegible]रतिर्नवोढा मीयते ४
न २

ति। पृथ्वीवृत्तं। जसौजसयला वसुग्रहयतिश्च। पृथ्वी गुरुरिति लक्षणात्॥१ एवं लक्षि
तां स्वीयामुद्दिश्य सिध्यर्थं त्रिधा विभजमानः प्रकृतमनुसरन्नाह॥ स्वकीया तु त्रिविधा
२ म टी १२ मुग्धा मध्या प्रगल्भा चेति। तत्रांकुरितयौवना मुग्धा सा चाज्ञातयौवना ज्ञातयौवना च।
सेयं क्रमसोल्लज्जाभयपराधीनरतिर्नवोढा। अस्याः स्वस्थाः ह्रिया मनोहरा। कोपे मार्द क्रिया १२
12 वी। नवविभूषणे समीहा। इत्थं विध्यमाह॥ मुग्धेत्यादि॥ उक्ता च। मुग्धा मध्या प्रगल्भेति
स्वीयाशीलार्जवादिगुणेति। यथोक्तं लक्षणं यास्तु तास्तु मुग्धां लक्षयति। तत्रे
ति तत्र तासु इत्यर्थः॥ अंकुरा संजाता यस्येति तदस्य संजातमिति तारकादित्वादित
च्प्रत्ययः॥ एवं यौवनं तारुण्यं यस्या इति। उद्भेदोन्मुखं वयस्तारुण्यमित्यर्थः। एतच्च
लक्षणं॥ अंकुरितमनंतरमेवाग्रे स्फुरयिष्यते॥ मुग्धामपि स्वरूपेण विभ

ज्ञातेसाचेति।अज्ञातमनवगतंवंधुजनेनतयावेसविशेषोसोतत्पर्यः।यौव
नंयस्याःययेतिवा।एवमन्यत्रापि।अंकुरितंहिस्फुटमस्फुटंचभवती
तिउभयभावेनयुक्तमेवविभजनं।परंतुप्राचीनैरिदमतिसूक्ष्मतयानोप
वर्णितं।अनेनतूपदर्शितमितिस्वचातुरीप्रकटिता।तथाचदशरूपकेपि
मुग्धानववयःकामारतौवामामृदुधीरातिलज्जोनवशाद्वससाधारण
त्वेनोभयमपिसंगृहीतमित्यनादृतं।अतएवनपृथक्भेदान्तरं।तामेव
पुनर्व्यवहारेणविशेषयति।सैवेतिज्ञाताज्ञातयौवनासामुग्धैवक्रम
शोज्ञातयौवनाअज्ञातयौवनाचेतियथाक्रममित्यर्थः।लज्जात्रधार्ष्ट्य
मतएवमयंचिरंरतेरपरिचयेनाशंकाताभ्यांपराधीना।परतंत्रातत्राधी
नेतियावत्।रतिःसंभोगक्रीडायस्याःसानवोढेतिव्यपदिश्यते।नवेअभिनवे

र मं
टी १२
13

ऊढामन्त्रीसंभोगादिव्यापारं प्रापितेत्यर्थः । न च क्रमस्य इत्यनेन विशेषणवि
शेषणयोर्यथासंख्यत्वेनाज्ञातयौवनालज्जापराधीनरतित्वेन यौ
वनाभयपराधीनरतित्वमिति शंकनीयं तथात्वे व्यभिचारात् ।
प्रत्येकमुभयव्यापारदर्शनात् । तामेव पुनर्व्यापारांतरेण विशिन
ष्टि । सैवेति । क्रमशः लज्जाभयपराधीनरतिरज्ञातयौवनाज्ञातयौ १२
वना च क्रमेणास्य प्रश्रया प्रश्रयाविनयः नम्रता गात्राकुंचनमिति
यावत् । तत्सहिता विश्रब्धनवोढेति व्यपदिश्यते । सा किं व्यापारेत्या
ह । अस्याइति । तामेव विशिनष्टि । कियाक्रियेति । क्रिया व्यापारस्तद्वि
षयकया क्रियालज्जया मनोहरा सक्रीडं व्यापारवत्या युक्तमेव वशीकर
णात् । कोपे मार्दवं कल्पापनेयता । नव विमृश्य तो समीहा जिघत्सा

अत्र कोपास्पदत्वमेव कारणम्॥ मुग्धामुदाहरति मुग्धेति। अंकुरितयौवना मुग्धेति
यल्लक्षणं तल्लक्ष्यमुदाहृयते चेत्याह। मुग्धा यथा॥ आज्ञप्तं किल कामदेवधर
रणीपालेन कालेनमधुमेवस्तु वास्तु विधिं विधास्यतीति नो तारुण्यमेणीदृ
शः॥ दृष्ट्वा खंजनचातुरी मुखरुचासौधाधरी माधुरी। वाचा किंच सुधास
मुद्गलहरीलावण्यमामंत्र्यते॥२॥ कामदेवधरणीपालेन। दीव्यतीति दे
वो विजिगीषास्तिकायः कामो मदनः स एव धरणीपालो महीपालस्ते
न यद्यपि देवशब्दस्योपसर्जनत्वेन पूर्वनिपातप्राप्तेन तथापि विशेषणवि
शेष्यभावे कामत्वाद्विजिगीषायाः प्राधान्येनोपसर्जनत्वविवक्षया
न पूर्वनिपातः एवं धरणीपालशब्देपि द्रष्टव्यं। आज्ञप्तं। त्वयि तत्र

स्थितवति ममापि स्थितिरुचितैव संगच्छते किंच तत्साहाय्येनाहमपि सर्व
जेष्यामीत्यवबोधितं संमतमिति यावत् । यथा कोपि राजा दुर्गाद्याश्रितः
रमंटी सन्मंत्रिसाहाय्येन सर्वानपि परान् जयतीति लौकिकं ज्ञातमिति
१८ ज्ञावबोधने रागविमुक्तिमित्याद्युक्तनिष्ठायां यस्य विमोचेतीरुप्रति १८
14 बंधे रागरनिटीतिरागलोपः । अत एव कामतारूप्ययोर्बंधुता व्यज्यते ॥
अवबोधानामानुकूल्यतया विविक्तावर्जनं । स च बंधूनामेवोचितः न प्रेष्या
णां दूतानां । एवं स्थिते बंधुतयोचितमेव कामतारूप्ययोः सहावस्थानमि
ति सिद्धं ज्ञातमिति यथा श्रुतेः तु, यम, परितापः । यः कामेन तमत्रातिष्ठे
ति प्रेरितेतारूप्यस्य स्थितत्वं पर्ये वा स्तु विधिं कुर्वंतिन तावतां कामस्यापि

स्थितिरागतानचकामन्स्थितिं व्यंजकपदमस्ति॥ वस्तुमितिपदमिति चेत्। तर्हि का
मेनस्वास्थित्यर्थमाज्ञप्तं कार्ये कुंवेन्नारु एपेननत्रस्थित्य र्थं भवति। स्वामिनाप्रे
रितोनुचरादिर्गृहादिसंपाद्यस्वयमेवप्रभुवेश्मनिनतिष्ठति। तदनुज्ञातकार्य
वत्तयातदेकदेशास्थितावपिनसर्वांगी। एतातारुण्यस्येत्पलंपथानिदर्शने
पिनसमंजसं लगतीतिप्रथमेवयौजननागरीयसीति सिद्धं। तथाचकामेनेत्यनेनै
वसिद्धेदेवधरस्याीपालेति सार्थकंभवति। किन्तु निर्धारे रत्नांकुमेगलरूपेकाले
समयेतारुण्यं यौवनं एणी हृदयामनलोचना या स्तनोशरीरवस्तुमवस्थानुव
सनेरनिद्धतुमुनइडभावः विधास्यतिकरिष्यतीतिहेतोरितिअप्युपाहार। हृद्या
खंजनचातुरीखंजरीटवेदग्धीचतुरशब्दात्ष्यञ्। तदनातरपिओरादिभ्यश्च
तिङीषिवियस्यपत्यकारलोपेहलस्तद्धितस्यतियकारलोपश्चामंत्र्यानइति

सर्वत्रसंबध्यते। किंचमुखरुचाचुरुकांतासुधायाः धरस्पंदस्तस्यपर्यंतस्यदमित्यपारा
टिप्पुराणामीतिडीपू। माधुरी आह्लादकोलावण्यविशेषः। चातुरीतिवक्त्रसाधना।
रसमं किंचवाचावाण्यासुधासमुद्रलहरी लावण्यसुधायाः पीयूषस्यसमुद्रस्तस्य
टी १५ लहर्यो भंग्यस्तासांलावण्यमनोहरत्वंत्राणमित्यते। आकार्यते। पतिभ्यां कामतारू
15 ण्याभ्यांस्पर्धिविधीयत इति। भवद्भिरप्यागत्यतत्रस्थातव्यमित्याकार्यत इत्य १५
र्थः। अप्रेरितत्वेपिदृष्ट्यादीनांपुत्तोसवस्वजनामंत्रणे। किमुनादितः प्रियहितार्थ
कृतेः। कृतिनोभवतिसुकृतः सुकृतामितिभावः। चातुरीतिपदेनस्वायन्तितसक
लमनस्कविल्लक्ष्यते। तेनचालौकिकचमत्कारिताव्यज्यते। यच्चपेशलोदरा इत्यने
नदृशोविशालत्वचपलत्वंप्रतीयते। तपापिनतावताभंग्यन्तरेणाप्रसक्तनीलि
मकटाक्षावलोकनमागतमितिरवंजनचातुरीतिविशेषणं। माधुरीत्यनेन

वाक्यादेकत्वं लक्ष्यते। तेन च तदेकधीतया चर्वणीयता व्यज्यते। लावण्यपदेन सदेम
स्मितज्योत्स्नात्वं लक्ष्यते। तेन चातरुणहृद्यया चित्रमोनुदता व्यज्यते। मुक्ताफल
स्य छायास्तरलत्वमिवांतरा। प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यते। इति भू
पालः। अत्रांगेषु चित्तपल्लवेषु सां। अत्र निवासोनुकृतकोसततारूप्य चिकीर्षितवास्तु विधा
नस्येतरवाक्यार्थहेतुतात्काव्यलिंगमलंकारः। लक्षणं तु प्रागभिहितं। स च प्रस्तु
तनायिकादृगादिप्रशंसनापेततुल्यगुणप्रस्तुतखंजरीटादिचातुर्यादिप्र
शंसनात् तुल्ये तदन्यतुल्यात्वेप्रस्तुतप्रशंसानुप्राणितः। उक्तं च। अप्रस्तुत
प्रशंसा स्यात् सा एव प्रस्तुताश्रयेति यद्वा कर्णदृगादीनां खंजरीटादिचातुर्या
दिसंबंध इति सादृश्यपर्यवसानादुपमापरिकल्पनान्निदर्शनालंकारः।
उक्तं च। असंभवद्वस्तुसंबंध उपमापरिकल्पकः। निदर्शनेति ॥ स चासंबं

धेसंबंधातिशयोक्त्यनुप्राणितः। असंबंधे संबंधरूपातिशयोक्तिरिति लक्षणात्॥ एवं व्यक्ताव्य
क्ताअलंकारसंसृष्टिः॥ उक्तं च॥ तिलतंडुलवद्व्यक्ता छायादर्शवदेव च॥ अव्यक्ता क्षीरजल
वत्पांसुपानीयवच्चसा। व्यक्ताव्यक्ता तु संसृष्टिर्नरसिंहवदिष्यते इति॥ वृत्त्यनुप्रासस्य सा
रसमं द्यालंकारः। एकस्यापि सकृत्पर इत्यत्र एकस्यानेकस्य वा द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रा
टी१६ स इति लक्षणात्। ननु अंकुरितयौवना मुग्धेति लक्षणोल्लसिता मुग्धोदाहरणमितरत्। न चा १६
त्र वास्तविकविधिं विधास्यति ननु विहित इति तारुण्यावस्थितेरप्युदाहृतेति कुतस्तेऽन्त
16 स्यांकुरितत्वमिति लक्षणोदाहरणयोरसंबद्धतेति चेत्। न च दृगादिभिः स्वजनचातु
र्योद्यामं त्रणमेव तदंकुर इति। तथात्वेपि तेषां कार्यकाले दृगादिसंबंधत्वेन गौ व
नोपकारकत्वात्। कामं त्रणकालस्य वा। तत्संबंधेपि यौवनानुप्रवेशात्प्रागेव तद्दृणं
नेऽसंप्रदायात्॥ अनुपलंभाच्च यौवनप्रवेशानंतरमेव दृग्विलासवर्णनमुचितं॥

उपलभ्यते च । किंच । ओल्लुण्ठे मकुरसुन उत्तीर्णे तारुण्ये उत्कृष्टमगणासौ । वृद्धावि
राणां च ढण्ढापरवदृश्यते हहहहरहनुहहिश्च यस्मिन्नित्यादौ उत्तीर्णापि तारुण्ये सापत्न
दृतेसा वृद्धापि नवोढवनानाविलासैस्तावद् हृदयं हरतीति यौवनापचये
पि चिल्लासस्तत्वात् दृष्टविलासादीनां यौवन परिवारत्वेनानवयवत्वेनां
कुरत्वाभावाच्च । न च कार्यं स्यात् दृष्टविलासादिनाकारं तस्य यौवनस्य निय
तपूर्वावस्थितिकतयानुमानमितिविधास्यतीति भविष्यत्कालेन सह
विरोधात् । न च विधानसंभावेपकारकत्वेन पूर्वमागतेनाङ्कुरणेन विरो
ध इति । गृहपतेः समकृतेकालएवप्रवेशस्योचितत्वात् । कार्यकालमा
गमनेनाक्षिप्तदोषापत्तेश्च । किंच । भोक्तुं व्रजतीत्यत्र व्रजनक्रियायाः
पूर्वकालत्वेनाविवक्षितत्वात् तु विधेः पूर्वकालत्वं अनन्तरं वसतीति नियुक्ते

भविष्यत्कालेन विरोध इत्युक्तं। तथा च लक्षणोदाहरणयोरसंबद्धतेति दोषस्तदवस्थ
एवेति चेत्। सत्यं। कुसूलस्थबीजेष्वंकुरकारकारयेतानि बीजानीत्युक्तेन तदानी
रसम मंकुरकारकत्वमिति कालसाधारण्ययोग्यताविवक्षेति यत् यौवनस्याप्यंकुरयो
टी १० ग्यताविवक्षा। अंकुरयोग्ययौवनामुग्धेत्यर्थः॥ यौवनस्यांकुरयोग्यत्वं त्ववाधित
17 मिति सिद्धमिष्टं॥ विषय उपन्यासः॥ युक्तं कुसूलस्थबीजानामंकुरकारकत्वा १०
संभवयोग्यताविवक्षा॥ प्रकृते तु संजातांकुरयौवनेत्यत्रांकुरजनने भौजनकालि
कतया योग्यतासंभवात्॥ एवं तर्हि अंकुरितयौवनेत्यत्रांकुरस्यैव द्वारे दे
र्भः॥ स च यौवने बाधितमुख्यार्थ इति अंकुरितशब्दोल्लक्षणया विकाशोन्मुखता
रुण्यलक्षयन् शोभोत्कर्षादिव्यंजयति॥ यदंकुरितं तद्धि कालेनोन्मुखं भवतीति
वर्तितएव सुप्रतिष्ठितं निरुपद्रवं जरतीति कास्मा विधिपूर्वकं स्तुतानुतानु नि

वालत्त्वलक्षणविकासोन्मुखता यौवनस्येति। अंकुरितयौवनविकासोन्मुखयौवनेति
लक्षणार्थस्यात्रपर्यसंबंधः सुलभमतिसर्वमनवद्यं॥ यद्वा किलेतियत्साहसजमेवै
णीदृक्कृतत्रापिपुनः कामसंमतं यौवनंवास्तविविधिपूर्वकं निवसतीतिकीदृशान्नाव
रापवतीसान्नवेदितिचिवीकरसं चित्रीकरणायेकिलशाब्दयोगेविधास्यतीति
मोक्षेल्लडयदाविति भूतेलृट्प्रत्ययः। वास्तुविधिपूर्वकेन रूपेणावस्थितिः
कृतेतिमवद्धिरप्यागंतव्यमित्यामंत्र्यत इति। एवंचभूतकालस्यसाधारण
त्वेनलक्षणोदाहरणायासंवद्धतास्फुटैवेत्यलमतिविस्तरेण। लक्षितार्थ
स्यत्रापिपद्येग्राह्यः॥ शार्दूलविक्रीडितंछंदः॥ लक्षणांतरंकं॥२॥ एवंसामान्य
रूपोमुग्धावयःसंधिरूपेणोदाहृत्यविशिष्टासुदाहरति। अज्ञातयौवने

ति यथेत्याह। नीरान्तीरमुपागताभवसाययोः सौम्निस्फुरन्नेत्रयोः श्रोत्रेलग्नमिदं
किमुत्पलमिति ज्ञातुं करं न्यस्यति॥ शैवालांकुरशंकया शशिमुखी रोमावलीं
प्रोंछति श्रांतास्मीति मुहुः सखीमविदितश्रांसा भरापृच्छति॥३॥ नीरादु
रसमं दकान्तीरं तटमुपागता निकटायाता शशिमुखी चंद्रवदना नायिकासीमा
टी१८ मर्यादा तन्नस्फुरन्ती विलसितेन तत्र विश्रान्ता इत्यर्थः नेत्रे विलोचने ययोस्त १८
18 योः स्तापेक्षते पिगमकतान्तामासः अवसाययाः कर्णयोः किमिदमुत्पलंकुव
लयं लग्नं संबद्धमिति ज्ञातुमवगंतुं श्रोत्रे श्रुती करं न्यस्यति प्रेरयति कर
रं न्यस्यतीत्यर्थः कोत्र स्याकोदा पूरसाध्येतादुक्तियोध कलांको त्रइतिनपो
नरुक्तं उत्पलदृगंचलयोः साधारस्याघस्मेतेन वितर्कइति भावः किंचाक्रेवा

ले जलनीलीजलनीली तु शैवालमित्यमरः ॥ तदंकुराः प्ररोहास्तेषां मोकया
विभ्रमेण ॥ समानगुणत्वादिति भावः ॥ रोमावली रोमोद्गमश्रेणीं प्रोक्तिस्त्र व
चिनोति ॥ उंछावचयने स्पर्शनीयार्थः ॥ अविदितसौरभराअविज्ञातनि
तंबभारा ॥ न च विभाषागमहंनविदविशामितिविकल्पितेड्ढेतेयस्य विभा
वेतीड्प्रतिषेधे कथमविदितइतिवाच्यं ॥ आदितइतियोगविभागज्ञापित
यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इत्यर्थेन लाभार्थस्य विभाषेति कथं ज्ञा
नार्थस्य प्रतिषेध इति यस्य विभाषेति प्रतिषेधानावादिद्धिद्धेः ॥ तत्र विशि
नानोदादिकेन साहचर्यात् नोदादिकस्यांगीकारात् ॥ आत्तास्मीतिस्मंगा
तास्मीतिसखीवयस्यां मुकुः प्रकृति ॥ जिज्ञासापूर्ववक्तीत्यर्थः ॥ उ
लविलोडनेन श्रमस्य संभावितत्वादिति भावः ॥ अत्र नेत्ररोमावली रा

रोप्यमाणायोः तत्र शैवालांकुरयोरज्ञातत्वलक्षणप्रकृतोपयोगितयापरि
णामालंकारानुप्राणितो द्वितीयचतुर्थचरणयोर्द्रष्टव्यः संशयालंकारः ।
रसमं आरोप्यमाणस्य प्रकृतोपयोगितया परिणाम इति लक्षणात् संशयलक्ष
दो १९ णं काव्यप्रकाशे । ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशय इति । स चात्र संबंध
19 असंबंधलक्षणातिशयोक्तिकोद्भावितभ्रान्तिमदलंकारांशसंसृज्यते । १९
शार्दूलविक्रीडितं वृत्तं ॥३॥ ज्ञातयौवनामुदाहरति ॥ स्वयं तु [illegible] नुरंमो
जलोचने त्वत्पयोधरगगनरखनकस्य धन्यस्य चेड्डचूडामणिष्यति ॥४॥
कचित्सखी परिहसति । भो अंभोजलोचने कमलनयने स्वयं भवतीति क्वि ३
रस्वयंभुरनुत्पादितः तथा शंभुः शं सुखं तस्मै भवतीति शंभुः सुखास्वाद
कः तत्पयः । मितंद्वाद्विभ्य उपसंख्यानमिति भवतेर्डुप्रत्ययः । यद्वा शं भवत्ये

स्मादिति शंभुरिति। नन्वर्थविशेषानिर्देशात्तदभावेपि विशेषाभावे सामान्यमेवो
पतिष्ठते इति चेन्न औत्सर्गिककर्तृविहितादित्यस्यापवादस्यापि तौ कर्त्तरि कृत्प्रत्ययप्राप्तौ अ
पादानकत्वनिरसंगतेर्निवाच्यं। सत्यमनुवर्त्तते। कृत्यल्युटो बहुलमिति बहुल
ग्रहणान्यथानुपपत्त्याज्ञापकेन कृन्मात्रस्य स्वार्थव्यभिचारे यथासंभवकार्थ
कतेनापादानार्थस्याप्युपचितत्वात्। कृतो बहुलमिति वक्तव्यमित्यादिव
दतोकात्यायनादीनामयमेवाशयः। क्षीरस्वामिनाप्यमरव्याख्याने यथा
संभवार्थमेव कृद्वृत्तिर्विहिता। तत्पयोधरः। भवत्कुचः। पयोधर इत्यत्र
साधारणधर्मपूरणप्रयोगितां गीकारे चास्यास्तनेन्द्रे तया च स्तुतत
याकुपमन्वर्थं पयोधरत्वमिति चेत्। सत्यं। बाधकाभावात्पयो न धर
तीति न ब्रवीमि। परं त्वस्फुटतया धरति। तदेव प्रसन्नो बहुरुत्तया स्फुट

यतीति युक्तैव योग्यकता तथा नायुर्वेदशास्त्रे पादीरनाड्याः कुमारीसंजातल
नपरिपूरिताः ॥ द्वीरं न भवते तस्मादातैवं चाधिकं यतः ॥ प्रसूतास्तु च नारी
दुर्वलिनसहस्रयतो तेन औत्रचिशुद्धिः स्यात् द्वीरमास्तु प्रवर्तत इति ॥ कस्या
रससं टीर २. विज्ञातस्य धन्यान्यस्य सौभाग्यवतो नरवनकररुहन चंद्र इव चंद्र इति नि २.
20 दर्शनालंकारः ॥ चंद्रशब्दोत्र वक्रिमांशलक्ष्ययनोत्कृदकत्वं व्यनक्ति ॥
सचूडायां शिरसि यस्येति । चूडाशब्दोत्र नीलिमांशलक्ष्ययनशोभां व्यन
क्ति एवं च चंद्र इव चंद्रचूड इत्यपि निदर्शना ॥ भविष्यति सत्यतिको ॥ नामस
धन्यो भविता यस्य नरवेनायं चंद्रचूडतामेष्यतीति । चंद्रचूडोप्युक्तविशेषण
णाविशिष्टः ॥ ननु समानाधिकरणानां वहुव्रीहिः स्यात् इति वहुव्रीहिः स
मानाधिकरणपदानां विधानात् कथं चंद्रश्चूडायामस्येति वैयधिकरण्य

बहुव्रीहिरिति चेत् । सत्यं । चूडानामकेऽप्यापाशः चंद्रस्य च तत्त्वासंभवे सामानाधिकरण्या
नुपपत्तौ । वर्तते च चंद्रमौलिरित्यादि महाकविप्रयोगः इति तन्निर्वाहत्वायाभिधान
वशाद्व्यधिकरणमपि प्रार्थ्यते । तथा चायमभिधानस्वभावो सिद्धो र्थः । यदभि
धानाय चक्रवृत्त्यादिवृत्तयः प्रयुज्यंते न च व्यधिकरणानां बहुव्रीहि विवक्षितार्थाभि
धानमस्ति । तथाहि नवा सिर्दृतमस्येति वा वराद्यो र्थः प्रतीयते न सहृत्तेन शब्दा
त्प्रतीयते । स्त्वनभिधानान्नेत्यर्थः । यत्र प्रतीते तत्र भवत्येवगमकत्वात्सामा
सः । गमकत्वं च शब्दशक्तिस्वाभाव्यात् । तथा चित्रेतोपि समानाधिकरणानामिति व
चनेयं च मुक्तवंतोस्य तत्र कथं न भवति समासः । वर्तते च व्यसमानाधिकरणप
दत्वं । तत्राप्यनभिधानमेवेत्युत्तरे सर्वथानभिधानमेव शरणं प्रयुक्ते तेष्वमी

रसमं
टी२१
21

त्तव्यं ॥ तत्र परा समानाधिकरणानामपि यत्र विवक्षितार्थाभिधानं तत्र समासः ॥
यत्र समानाधिकरणेष्वपि न विवक्षितार्थाभिधानं तत्र समासो न भवती
त्यकिंचित्करत्वमिष्टेः ॥ तथा च भाष्यकारः ॥ सर्वथा ॥ नभिधानमेवाश्रयि
तव्यं ॥ अन्यथा कृतेपि परीमाणेन इह बहुव्रीहिः प्रसज्येत पंचचभुक्तवन्तो
स्येति ॥ तथा वायं अभिधानस्वभावः सिद्धस्यार्थस्य प्रपंचः सर्वस्ति भाष्यकाराद्य २१
भिमतं तथा च वामनः ॥ अव्ययो बहुव्रीहिव्यधिकरणो जन्माद्युत्तरपद इत्यास्ता
मतिप्रसंगेन ॥ अपमर्थस्त्वस्माभिरुदाहरणे घवटीकायां विशेषेण प्रत्ययादि
तत एवाचं गतव्यः सप्तमी विशेषणे बहुव्रीहाविति चूडाग्रादेः स्वपूर्वनिपा
ते प्राप्ते गडादिभ्यः परवचनमिति परनिपातः ॥ गडुकण्ठः प्रयोगतोनुसर्त

व्याऽइतिपदस्य जारीकारः कस्येत्यनियतत्वेन प्रतीतावपरिसीतत्वेन कन्याख्यप
रकीयत्वे च तस्यास्तद्विधेवपरिसंख्यानेन मुग्धादिभावाभावेन कथं मुग्धो
दाहरणे परकीयाजिनरूपणमित्यसंबद्धमिति चेत् ॥ सत्यं ॥ कस्यचधन्यस्य
त्युक्ते कोऽसौ धन्यस्तं भर्त्तारं यस्य न खे नायं यदिंद्रचूडस्यादित्यसंकेतितत्वादि
का सखीयं पृच्छतीति निर्वाह्यं ॥ न च चंद्रचूडतादात्म्येन धन्यस्य भवनेतात्प
र्यात्किमशुद्धस्य तत्रैव विश्रब्धत्वात् परणीतेवंति नियामकाभावात्प
रिणीतास्वीयैवेदं नायिकेतिवाच्यं ॥ नखक्षततदातुरनिपतत्वेन जार
त्वे पर्यवसानादूढत्वेपि परकीयात्वस्य तादवस्थ्यात् ॥ यद्वा भवतु वा य र
कीयेयं ॥ न चोक्तरीत्या[illegible]त्वादिकं परकीया[illegible]नुपपन्नं ॥ बाधकाभा

वेनस्वकीयायामिव तत्रापि संभवात् ॥ न च द्विविधैव परांगने ॥ ति विभागवश
नात्संभवेपि न वर्ण्यत इति । तत्रापि संभवादेव बीजमिति तात्पर्यात् ॥ किं च वे
रसम यो मुग्धा या सा तदुदाहरणं वयो मुग्धात्वं च परकीयायामपि न निषिध्य
टी २२ ते । द्विविधैव परांगनेत्यनेन भाव मुग्धात्वं च परकीयायां न संभवतीति वि
22 भागेन तदेव निषिध्यते ॥ न नु वयो मुग्धात्वमिति लक्षमतिप्रसंगेन ॥ अत्र २२
श्लेषेणानुगतः पयोधरस्योपमेयस्योपमानेन च चंद्रचूडता धर्मेण
साक्षात्संबंधासंभवाच्चंद्रचूडशब्द शब्द इति प्रतिबिंबकरणात् निदर्श
नालंकारः ॥ १३ ॥ तेन चात्र भवद्धस्तसंबंधादुपमानोपमेययोः ॥ प्रति
बिंबक्रियागम्या यत्र सा स्यान्निदर्शनेति सच्चमदंके भेदलक्षणा

नियायोन्तुपमासंकीर्णः। नचात्रसमासोक्तिरितिशंकितव्यं। उपमेयाग्रहणो
केवलंविशेषणसामात्रसास्याद्प्रस्तुतप्रतीतौतद्ग्रहणात्।। नचेतरासाधा
रणेपि उपमेयस्य चचंडचूडत्वाशौर्यौन्नत्यगुणात्तु उपमानास्यनसत्वेना
धिक्ये व्यतिरेकः इति शंक्यं। उपमेयस्यैवाधिक्ये तस्यैवात्रात्। उभयोरेकत
राधिक्यं व्यतिरेक इति यदपि सामान्येनालंकारिका वदंति। तत्रापि एकत
राधिक्यमित्युपमेयाधिक्यंविवक्षितमिति विवेचनीयं। अत एव काव्यप्र
काशकारोपि उपमानाद्यन्यस्य व्यतिरेकः स एव सः इति लक्षणं तु कार
त्वादावित्यनेनोपमानाधिक्यमनच्युप्रत्याचष्ट्यत तत्त्वनुप्रासस्य शब्दा
लंकारः। ननु श्लोकादेरलंकारमात्रव्यंजनसाहस्येपि स्वरभेदात्कथं व

रीसाम्याभावादनुप्रासत्वमिति। उच्यते। स्वरसादृश्यस्यानियतत्वेन व्यंजनसादृश्य
मेवनियतमिति सर्वालंकारिकाणामाशयइति सिद्धमित्यलं प्रपंचेन॥४॥ से
रसमं वक्रमश इतिलक्षितां न वाढामुदाहरति। नवोढेति। यथेतिवक्ष्ति॥ हसो
ढी२३ घन्तापिशायनेविनिवेशितापिक्रोडेन्तापियनतेवहिरेवगेनु॥ जानीम ४३
२३ हेवनवधूस्पन्तस्यवस्यायः पारदं स्थिरयितुंदमनेकरसा॥५॥ नकेवलंवा
गाद्यवरुद्धैवापितुहस्तिकेरेधत्वा अवलंवितापीत्यपिशब्दार्थः। नकेवलक
रावलंवनमेव विश्रंभजनकमपितु शायनेतल्पेविनिवेशितास्यापितापी
त्यपिशब्दार्थः। नकेवलं तल्पारोपणामेव विश्वासकमपितुक्रोडेनुतात्र
रेक्रोडेमुञ्जान्तरमित्यमरः। हृतायापारितापीत्यपिशब्दार्थः। नववधू

र्वेबोः बहिरेवागंतुं यतते प्रयत्नं कुरुते तज्ज्ञानं च परमार्थीनत्वादिति भा
वः यद्येवमपि जानीमहेव यमितितर्हिमः नवोढा यः कृतीपारतंत्रपत्नेच
पत्नोरसः स्नेतस्य पारतंत्र्यमः अत्रामरसिंहः हीरस्वामिप्रादतेनपार
तमितिपठितत्वं अभिधानेतत्क्रमेव तत्र हीरस्वामिनापिव्याख्यानंपिपृत्ति
तिपारतः पारंतनोतीतिवा पारदमितिपाठस्तुगतानुगतिकतयाप्रयुक्तोप्यु
पेक्ष्यः ॥ करेस्तास्थिरयितुमित्यत्र यत्किंचित्परिगणनेनन्मतेतद्दृशास्त्रावात्
आतिदेशिकस्यानित्यत्वात् नदभावः स्थिरीकर्तुं सोमनेदस्तोमेवतितस्यव
स्यातदा क्रमसौयाभवेदित्यर्थः चपलाक्रमसास्यपरिचितत्वादितिभावः ॥
अत्रोपमानोपमेयसमानधर्माणां बिंबप्रतिबिंबतयानिर्देशात् साधर्म्यरा
दृष्टान्तालंकारः दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिंबनमितिः सतत्वभावेप्य
नुगतः वसन्ततिलकावृत्तं ॥ उक्तंच वसंततिलकानमजाजगौगः इतिलक्षणान्तप

विस्रब्धनवोढामुदाहरति ॥ दरमुकुलितनेत्रपालिनीवीनियमितबाहुकृतोरु
युग्मबंधं ॥ करकलितकुचस्थलेन नवोढा स्वपतिसमीपमुपैति कस्य यूनः ॥ ६ ॥
दरं ईषत् न तु ईषदर्थे दराव्ययमिति विश्वः ॥ मुकुलिते मुकुलीभावं च प्रापिते लज्ज
रसमं येति भावः ॥ नेत्रपाल्यौ यत्र क्रियायां तथा दरमुकुलितनेत्रपालि ॥ लज्जिता चेयं
टी २८ दृष्टिः ॥ उक्तं च ॥ मनागंचितपक्ष्माग्रत्रपास्रस्तकनीनिका ॥ संसक्तार्धपुटा दृ २८
२५ ष्टिर्लज्जिता लज्जिते स्त्रियइति ॥ देहरागभयेनेति च का व्याख्या योदाहृरसंग
तास्यात् ॥ दृष्टिलज्जयोरसे बद्धत्वात् ॥ न च भीतायां दृष्टौ मुकुलितत्वमिति सं
प्रदायः ॥ तथाहि नतावङ्का ॥ लज्जितेति विधानात् ॥ नापि शंकिता ॥ फुल्ली
लेव चकिततारका तेन च लोलताभिधाने मुकुलितत्वासंभवात् ॥ नापि मुकु
ला ॥ ग्लानेति विधानात् ॥ तादृशानंदस्य च मध्याप्रगल्भास्वभावत्वेन मुग्धा
यामसंभवात् ॥ नापि कुंचिता नेत्रो दुःप्रेक्ष्या विलोकनेनोत्पत्तेः ॥ नाप्यर्धमुकु

त्वा। सुखविशेष एव तदुत्पन्नत्वात्। नापि भयान्विता स्यादियं दृष्टिरपि। त्रासनिः
क्रांतमध्येव विस्फारितपुटा भिया। विलोलतारका भीत्या दृष्टि रूक्षा भयान्वि
तेति लक्षणात्। पोषेगात्। तस्मादनुपपन्नेयं व्याख्या। यद्येवं नहि कथं महाक
विः सपदि मुकुलिताक्षी रुद्रसंरंभभीत्येति उक्तविधयानुपपन्नत्वात् इति
चेत्। सत्यं। किं कर्तव्यं महाकवेरुपरोधेन प्रकृतरसानुगतं भीत्या ध्यमिधं दृष्टं
तरस पूर्वमंगीकरणीयं। यद्येवं तत्प्रकृते प्युपयोगमेष्यति। भवतु उपयुज्य
तां नाम तल्लक्षप्रसंगेन। यद्वा। क्रोधात्पुरुषरुद्रनेत्रसमुद्भूतवीतिहोत्रदर्श
नभयेनाकुंचिताऽपि दृष्टिः सपदि मुकुलिताक्षीमित्यत्र वक्तुं शक्यते। आ
कुंचिता लक्षणां च। आकुंचत्तु टपत्माग्रासम्यक् कुंचितकनीनिका॥ या दृष्टिः
कुंचिता सा ज्ञानेऽतोऽदुःप्रेक्ष्य वस्तुनीति। प्रकृते तदुपपत्तेरभावात् यपापर्वेया
जनीयं। नपानीवीनियमितवाकुनी व्याकर्षं मुकग्रेथो। नारीकर्षं मुकर्षं

योनीवीस्यादिति वैजयंती ॥ नियमितोनन्यकर्मैकतयास्यापितो वौकुर्य
त्रतस्याः । नपाहृतसंपादितऊरुयुग्मस्य वंधः परस्परालग्नतायत्र तथा
रसमं तथाकरकलितकुचस्थलेकरेणाकलितकुचस्थलेयत्र तत्पानवोढ
टी२५ कस्याविदग्धस्यनवोढायूनस्तारुण्यस्य समीपमंतिकमुपेत्यासाद्यस्वपिति २५
25 निद्राति । अत्र स्वभावोक्तिरलंकारः । सचयुवसमीपस्वापस्यपादत्रया
पेहेतुलाङ्काव्यलिंगानुप्राणितः । पुष्पिताग्राहृतं ॥ अयुजिनयुगरे
फतोयकारोयुजिचननौजरगाश्चपुष्पिताग्रेतिलक्षणात् ॥ १६ ॥ इति
मंजरीविकासेगोपालाचार्यविरचितेमुग्धानर्मुग्धारब्धंकुसुमनिभंविक
सितमास्वादयंतुरसरसिकाः ॥ एवंमुग्धांनिरूप्यावसरप्राप्तांमध्यांनिरू
पयति ॥ समानलज्जामदनामध्या ॥ एषैवचातिप्रश्रयादतिविश्रब्धनवो
ढा । अस्याश्चेष्टा ॥ सागसिप्रियेयसिधैर्येवक्रोक्तिरधैर्येपरुषवाक्यपा ॥

समानौ तुल्यबलतया परस्परं परस्परप्रसराविति तात्पर्यं लज्जामदनौ यस्या इ
ति। सामर्थ्येति व्यपदेशाद्वैनौत्यर्थः॥ यद्यपि रूपैव चातिप्रश्रयादति विस्र
ब्ध नवोढेति कश्चित्वाह। तथापि सर्व्वसंमतत्वादनुदाहृतत्वाच्चायं पाठः इ
ति। यादृशमतीव धार्ष्ट्यभाववतीतस्यां तद्रूपं धार्ष्ट्यं प्रयुक्तं च रूपमारामधा
व्यवहारं संभवइति। सा किं क्रियावतीत्याह। छाया स्याद् इति साग सिसापरा
धेऽप्यागो परा धीमं तु श्वेतत्वमः। प्रिय सिकोतसतीति शेषः। धैर्य्यं धैर्य्यवत्वेव
क्रोक्तिः। कैवेसा का कावाच्यान्तरप्रत्यापकं वचनमित्यर्थः। वक्रवाक्यप्रबं
धिकेत्यर्थः। अत्र चैवंविधपरुषानिष्ठुरावाक्यस्याइति। एवं लक्षितैतद्विशेषम
ध्यानुदाहरति। यथेत्याह॥ स्वापेक्षिया ननविलोकनमहानिरवस्थापच्युतो
प्रियकरस्मरहरागसंगः। रे स्यं सं रहमुखीपरिचिंतयंतीस्वापेविधातुमपहातुमपि
रा

प्रपेदे ॥७॥ स्वापेति द्राघयां प्रियाननं विलोकनं हा निरवेक्षांतमुखावलोक
नरूपेण नाशोच श्यं भावीत्यर्थः ॥ मदनरसरभसतया नि द्राया पि कांत
रसमम मुखावलोकनविघ्नीभूतया जीवितेनैष्फल्यं मन्यमानेत्यर्थः ॥ तथा स्वा
टी २६ पच्छलतो निद्रातया नप्रियकरस्पर्शग्रहणं रत्यर्थं चेष्टयेदिति भावः ॥ ततः प्रसं २६
26 ग ॥ स्वापच्छलतोऽपि प्रियकरग्रहणावसरार्थे च स्यादित्यर्थः ॥८॥ पर्यंकोत्संकुच
न्नुन्नाया विष्टं खल्वायाः समयं प्रतीक्षमाणया मम स्वप्नमेव प्रियकरग्र
हणागतमपलतेति तथा च कथं रतिं वामिति संभावयंतीत्यर्थः ॥ प्रियेण
करग्रहणं मितिविमृतहसता प्रियप्रियत्वपूर्वक संभोग प्रसंगात्तस्याना भि
ष्टाया किंतु प्रत्युत प्राये वेत्युपेक्षा ॥ षष्ठी विग्रहे तु नवोढात्यागस्वानिष्टा
ऽत्यनुभयकोटिकप्रकारं चिंतयंती विचारयंती कमलमुखी स्वाधं

निद्रां विधातुं वज्जाल्लत्यागस्य दुःकरत्वादिति भावः हातुं त्यक्तुमपि प्रियमुखवि
लोकनहानेरनुपेक्ष्यत्वादिति भावः ॥ प्रवेदस्त्र निश्चकार्ये द्वयसमयात व्याकु
लाबभूवेत्यर्थः ॥ अत्र च विधानहानाभ्यां तुल्यबलेन तयोर्लज्जामदनसा
म्यकरणेनैव स्फुटैव लक्षणोदाहरणयोः संबद्धता ॥ अत्र च हानविधान
योरन्यतरनिश्चयाभावेन संदेहालंकारः ॥ स च स्वापतत्यागयोर्विधेय
त्वेनानिश्चसंभावनया तन्निषेधः इत्येवं विधेयत्वे निषेधस्यास्फुटत्वे
मूढाक्षेपानुप्राणितस्तु पनयापि संसृज्यते ॥ ३ ॥ ते च मूढाक्षेपो विधौ व्य
क्ते निषेधे चास्फुटे सातीति ॥ वसंततिलकवृत्तं ॥ लक्षणं तूक्तं ॥ ७ ॥ ६
ति मंजरीविकासे गोपालाचार्य्यविरचिते मुष्मिन्रामध्याख्यकुसुम

मिदं विकसितमास्वादयंतु रसं रसिकाः ॥ एवं मध्यां निरूप्य प्रगल्भां निरूपय
ति ॥ पतिमात्रविषयके लिंगे विदग्धा प्रगल्भा वेश्यायां कुलटायां च पतिमात्र
रसमं विषयत्वाभावान्न तत्रातिव्याप्तिः ॥ अत्र स्पष्टा तु रतिप्रीतिरानंदात्संमोहः ॥
टी २७ गर्हीतलक्षणपदे रतिव्याप्तिं परिहरति । वेश्यायामिति । वेश्यायामति २७
27 व्याप्तिवारणाय पतिपदं । कुलटायामतिव्याप्तिवारणाय मात्रपदमि
ति । सा किं किं यावतीत्याह । रतौ संभोगे प्रीतिः इतरापेक्षया तत्परः । आनंदा
त्संमोहेऽज्ञता । तत्र रतिप्रीतिमतीमुदाहरति प्रथममितियपेत्याह ॥
संस्पर्शपर्यन्तमाकल्पमाबदनमालिंग्य पर्यंकस्थलीं निष्पीयाधरबिंबमेवसम
पाकल्पमुदस्याल्पकं । देवस्य भुजनीपतेस्समुदये जिज्ञासमाने प्रिये वामा हीवसनांच

लेः प्रवरा योनी लोत्पलं निकृति ॥ ८ ॥ सानंसे सखस्य स्तनमर्दनं विधाय वदनेमुख
माकलय्य स्वमुखेन चुंबनाय संयोजयेत्सर्पेः ॥ ल्पपिलघुपूर्वादिनि रोरफादे
शः एकवल्लोपविधानेनल्प्य यादेशो नानाश्रयत्वान्नाल्लोपस्यासिद्धत्वं ॥
केन स्यलंकरणं प्रदेशमालिंग्य च्युनेनगाढालिंगनतान्यजनितानव्यति
रेकेणानस्यासंभवात् दुग्धजलाभिधानमेतदालिंगनं ॥ उक्तं च ॥ त्र
केस्थितापाचशयनेमृगशावकाक्षीगात्रे प्रियस्य विशतीव नितांतरा
गात् ॥ गाढोपगूहनवशेन निरंतरं यत्संश्लेषमाकुरिह दुग्धजला
भिधानमिति ॥ यद्वा जघनोपश्लेषाख्यमेतत् ॥ उक्तं च ॥ ऊरुकलिततदी
यश्रोणिसारस्योपरिष्टाद्व्रजति यदिह नारी स्रस्तकेशोत्तरीया ॥ करज
दशनक्षतं चुंबनं वा विधित्सुः कथयति जघनोपश्लेषमेनं मुनीन्द्रः इति

अधरोबिंबमेवेतिरूपकं अधरबिंबंतैः पीयअधरबिंबपानेविधायतिः
पीयतिपीङ्पानइत्यस्यरूपंपिबतेस्तुनरूपंपीतीतिप्रतिषेधात्
रसमं अंबरंपरिधानीयमपाकृत्यपरिहृत्यअलकंकेशकलापंव्युदस्यो
टी २८ 28 द्दीप्यएवंआन्तररतप्रसंगपूर्वरंगीभूतबाह्यरतेनालिंगनादि २८
नानायिकामुत्कंठयितेत्यर्थः।उचितमेवैतत्।उत्कमपिमोहनेना
रमेत्तावद्यावन्नोत्कंठिताप्रिया।।अन्यपानसुखोत्पादिरशीतिर्केक
राइवेति।अपिच।।आदौरतंबाह्यमिहप्रयोज्यंतत्रापिचालिंगनपूर्व
मेवेति।ननुयद्येवंसुखाकलनस्यान्यपानपर्केयनचुंबनावगतौस्तन
स्पर्शचुंबनयोःप्राथम्यंकथंतत्रापिचालिंगनपूर्वमेवेतिसंप्रदाय
स्थितिः।नैतत्।आन्तररतापेक्षयापूर्वकालीनत्वमेतेषांनपरस्परं

पूर्वापरकालतानियमः॥ ननु आकंठाश्लेषप्रमादो विधायानंतरं स्तनस्पर्शादि
रितिरसिद्धसंप्रदायस्थितिः॥ इत्तत्रिया तु कविना विपर्यस्तमुक्तं। न च कंठा
श्लेषानंतरं वदनाकलनस्य विंबाधरपानेन संबंधे। आलिंगनपूर्वकत्वसिद्धिरि
ति वाच्यं। स्तनस्पर्शस्य तु उभयोरपि पूर्वरंगत्वेन निर्वक्तुं शक्यते। सुखधरता
स्य बल्लेपर्यवसानेन प्रगल्भायां च बलेन चुंबनवर्णने असंप्रदायात्। व्रीडाप्र
धान्येन वक्त्रापहरणाद्वे बलेन चुंबनं मुग्धायामेव युक्तमिति कामतंत्ररहस्यवि
दः॥ अतएव बलादि प्रयुक्तमिति निमित्तकारणं चुंबनमेतत्। उक्तं चारतिरह
स्ये चित्रितपमपितदेतत्कन्यकानामयोज्यमिति। अत्र कन्यकाशब्दो मुग्धाप
रः सो॥ न निमित्तकारणचुंबने च चित्रितपमपोल्लिखितेति तल्लक्षणं सा च तत्रैवा॥ न
मित्तकमिदमाकुर्याज्जिते यद्बलेन प्रियमभिमुखयेत्कन्यस्या निमित्तं तु दस्ये
ति। इतरलक्षणानां तु विस्तरभिया न लिख्यते। मुग्धा निरूपयति। दृष्टोपायाह।

सकंपाचुंवनेवक्त्रेहरस्यैवावगाहितेति ॥ प्रगल्भायास्तुतत्कलज्जातेनस्वयंविचि
त्रकेलौस्तुकेपिचोत्कचुंवनासंस्तवः ॥ ३ ॥ केवदनान् एकेएवमन्येपिपरित्यक्तह्रीयं
त्रसा वेदग्ध्यप्रागल्भ्याः प्रगल्भाव्यवहारा वेदितव्या इति । यद्येवं कुपं वदन
रसमं माकलय्येति युक्तो न घटतेति व्याख्यायते । किंतुक्त्वाकलय्य चुंवनाये संवंधः ।
टीर२९ पिवेति व्याख्यानपूर्वमेव तस्मात्कंठं संश्लिष्येति पूर्वमुक्तान्नेतरं वदनं स २९
29 चुंव्यवाधरं निपीयेत्यादिपाजनीयं स्फुटे वालिंगनपूर्विका पूर्वे संपरिपा
टीत्यलंप्रसंगेनस्ववचवाहारतंप्रसंगोपित्वेतियारिप्रौढ्यं क्रांवुजिनीपतेः
कमलिनीनाथस्यपतत्सनाथत्वात्तस्याइति भावः । दैवस्यकमलवांधवस्य
सूर्यस्येतियावत् ॥ समुदयं सम्यक्कृतपोदयं । नाद्दिवा मैथुनं कुर्यादिति रीत्या
रतैरत्वंयभूतमिति भावः ॥ प्रियेवल्लभे जितासामानेज्ञातुंकृतोद्योगा सती

त्वर्थः। ज्ञाम्रस्य दृशोः स्मन इत्यात्मनेपदं। वामवकेत्राक्षिपस्याः इति। वामं सव्ये
प्रतीपे चेति विश्वः। स्फुतिगतं विकसत् कमलं दृष्ट्वा इत्यूहयेति भावः। सा नायि
कावसनांचले वस्त्रप्रान्ते विकासरं भसतया वदुश्चयत्नेनापि न स्थगितं
भवतीति चकं चलैरिति वकुलोत्ताधन्यते। अत्र वराणयोः कर्णस्तत्संबंधी यो ४
त्वर्थः॥ नीलोत्पलं नीलकमलं। सूर्योदयविकाशितात्तस्येति भावः।
निह्नुते स्थगयति। कमलविकासेन लिंगेन सूर्योदयो प्रियो मान्वमं
स्तेति धियेति भावः। मोहन प्रियया या युक्त्या वा परिपूर्णकामत्वेनेवमा
यासः। पांडुगंडतटेतरत्वं तस्यैव शोभाजनकत्वान्नीलोत्पलेतिः॥ यद्वा॥
वसनान्तेन नीलोत्पलं निह्नुते नास्तीत्यपलपतीत्यर्थः॥ अपलापय

रसमं
टी ३
30

स्तुनिकुरुंब इत्यमरः। यद्वा नैतन्नीलोत्पलं किं तु मदक्षिकटाक्षसंवेष्टादासनकुटा
इति अपह्नवध्वनिः अपह्नुतिः।। अत एव नामासीति सहृदयं। उत्पलेनेकदलकुल्लायां
चल्ला इति वकुलोक्तिः।। अत्र उदयेपि अत्र तथ्यस्यानुदयस्यारोपरागायोदपालि
गस्यतथ्यस्य विकसितस्य कमलस्य गोपनेन अपलापेन वा अपापस्या अप ३
ह्नुतिरलंकारः।। उक्तं च। अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिरिति। स्व
रूपकानुप्राणितः। तद्रूपकमभेदो य उपमानोपमेययोरिति लक्षणा
त्। शार्दूलविक्रीडितं वृत्तं। लक्षणं तूक्तं।।८।। आनंदसंमोहवतीमुदाह
रन्ति ह्यनीयमिति। यथेत्याह।। नखक्षतमुरस्थले धरदले रदस्य व्रणाचु
तावकुलमालिकाविगलिता च मुक्तावली।। रतांतसमये मया सकलमेत
दालोकितं स्मृतिः क्व च रतिः क्व च क्व च न वालिशिष्याविधिः।।९।। काचिन्नायि

कासखीमनु वदति हे आलि सखि आलिः सखी वयस्या चेत्यमरः॥ उरस्थले न
खदांतं किं च अधरतले अधराधःप्रदेशतले खंडितया। अधरयोरिति विश्वः। उप
रिभागापेक्षया अधोभागस्य किंचित्कठिनत्वाद् पासदंतो व्यापाकरमपि नावगत
मिति तलशब्देन ध्वन्यते अत एवोत्सृजेन कास्यं दंतपदमेतत्। उत्सृजेन कस्मा
द् अधरावखंडे इत्थं यद्दृढपीडनं तस्मादेवेति लक्ष्यमाणात्। च्युता बकुलमालिका किं
च विगलिता त्रुटिता मुक्तावली मुक्ताहार इत्यर्थः। प्रागल्भ्यप्रयुक्तसुरतवैचि
त्र्यमुभयत्रापि हेतुरिति भावः॥ एतच्च नखदंतादिसकलं मया रतांतसमयेसुर
तावसानकाले। आनंदसंमूढत्वेपि रतांतकालमेवावलंबेन स्मृतौ न खदंता
दि विलोकनं न पीतिनायिकाचातुरी समय शब्देन ध्वन्यते। रतांत इत्युक्तेनुवि
लंवितमपि स्मृतं प्रतीयते न च न चतुरकामिनीविषयकमिति। उक्तं चानि
तंबाच्छादनं श्रीघ्रं वेलक्ष्यं लज्जितं स्मृतं। दृष्टिं खेदालसां कुर्यान्मुक्तकेशापि

भूषणेति। आलोकितं तथा च सति तत्र स्मृतिः क्व किंचित्संभोगमात्र
स्मरणेऽपि विशेषस्मृतिः क्वचेत्यर्थः॥ तथा च विगलितवेद्यान्तरैश्चानंद
रसमं चातिभरिते सति रतेरपि संभोगोऽपि क्व संभोगमात्रसामान्यस्मृतिरपि
टी ३१ क्वेत्यर्थः॥ एवं च यत्र संभोगसामान्यस्मृतिरपि संदिग्धा नास्त्यपि वा॥ ३१
31 तत्र तत्वरतिविशेषविषयकः शिक्षाविधिः क्व चा। क्वेत्य इत्यर्थः॥ प्र
गल्भायाश्च संभोगे सर्वथा स्मृत्यनंगीकारे प्रागल्भ्यप्रयुक्तसुरतवै
चित्र्यकोविदत्ववर्णनमनुपपन्नं तथा हि। क्वचित्तां चुम्बनालोकैः क्वचि
दंगरूपकांचमालिन इत्यादि प्राचीनैरुदाहृतं इह तु विस्तरभिया
न लिख्यते॥ अतः संभोगमात्रस्मृतेः अंगीकर्त्तव्यैव वा। कोऽयं कास्मि

रतंतुकिंकथमितिस्वत्यापिमेनस्मृतिरित्यादिस्मृत्यभावपरत्वेपिन्यय।
महमिदमिदमितिविशेषस्मृतिर्नास्तीति।केचित्।किंतुसंभोगमा
त्रेस्मरणेसत्यपिअनंतरंरतंतुकिंकथमितिस्वत्यापिसुतरांअत्रत्यंप
स्यांसास्वत्यासंभोगमात्रात्मविषयिणीत्यर्थः।स्मृतिर्नसंभोगमा
त्रेस्मृतौसुरतेवैचित्र्यमनंतरंचतदभावेचातिसंमोहइतिप्रगल्भायां
रतिवैचित्र्यसंमोहाविति विवेक्तव्यौ।अन्यथाप्रियसंस्पर्शएवाति
संमोहेकदासुरतवैचित्र्य।कथासंमूढारतवैचित्र्यंकुरुतेतिईकदा
संमूढत्वासंबद्धतापत्तिः।कदाचित्कत्वेत्वकोऽतनोऽवितस्यात्।ननु
यद्येवंसंभोगमात्रस्मरणेपिवैचित्र्यस्यवैशिष्ट्यादवगतत्वेनकथं

सुरतवैचित्र्यमिति चेत्तान्त्रदृष्टान्तवलात्तथाहि कश्चिद्धृष्टक्रीडारसिको विस्म
तव्स्वात्मीयपरभावोऽस्मत्गुर्वादिशिक्षाविधिः अज्ञातत्रस्तापीडामृधादिभ्रं
शोर्युद्धमात्रस्मृतिकोऽस्वपरिवर्तनगमनादिताडनादि वैचित्र्यमपि विदधातीत्य
रसमं लं प्रसंगेन । एधीरहृतां लहृतांतरूढं ॥८॥ ॥इति मंजरीविकासे गोपालाचार्यवि
टी ३२ रचिते मुग्धासिमन् । प्रागल्भ्यकुसुमविदेविकसितमास्वादयंतु रसिकाः ॥ एवं ३२
३२ निरूपिते मुग्धीयानुग्धादिभेदे पुनर्मध्याप्रगल्भे भेदान्तरैरनेकविधे इत्याह ॥
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा । अधीरा । धीराधीरा चेति ।
व्यंगकोपप्रकाशिका धीरा । अव्यंगकोपप्रकाशा अधीरा । व्यंगाव्यंगकोप
प्रकाशा धीराधीरा । इयांस्तु विशेषः मध्याधीरायाः कोपस्य गीर्व्यंजिका । अ
धीरायाः परुषवाक् । धीराधीरायाश्च वचनरुदिते कोपप्रकाशिके प्रोढया
स्तु धीरायाः रतौदास्यं अधीरायास्तु तर्जनताडनादि कोपस्य प्रकाशकं । धीरा
धीराधीरायाः रतौदास्यं तर्जनताडनादि

तस्या॰
